# ऋणमोचन मंगल स्तोत्रम्

श्रीमङ्गलाय नमः
मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरासनो महाकायः सर्वकर्मावरोधकः ॥ १ ॥

लोहितो लोहिताङ्गश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥२॥

अङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टे: कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥३॥

एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥४॥

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥५॥

स्तोत्रमङ्गारकस्यैतत् पठनीयं सदा नृभिः ।
न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥६॥

अङ्गारक महाभाग भगवन् भक्तवत्सल ! |
त्वां नमामि ममाशेषमृणमाशु विनाशय ॥७॥

अतिवक्र ! दुराराध्य ! भोगमुक्तजितात्मनः ।
तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥

विरिञ्चिशक्रविष्णूनां मनुष्याणां तु का कथा ।
तेन त्वं सर्वसत्वेन ग्रहराजो महाबलः ॥ १० ॥

पुत्रान्देहि धनं देहि त्वामस्मि शरणं गताः ।
ऋणदारिद्रयदुःखेन शत्रूणां च भयात्ततः ॥११॥

एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् ।
महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥१२॥

https://bhajanganga.com/bhajan/lyrics/id/31525/title/rinmochan-mangal-stotram

अपने Android मोबाइल पर BhajanGanga App डाउनलोड करें और भजनों का आनंद ले |